## PART–IV

## LANGUAGE–I

## SANSKRIT

| अभ्यर्थिनः **चतुर्थभागस्य (Part-IV)** प्रश्नानाम् **( प्र.सं. 91-120 )** उत्तरं दद्युः, यदि तैः **संस्कृतं प्रथमभाषा**रूपेण **(Language-I)** चितम्। |
|---|

**निम्नलिखितं गद्यांशं पठित्वा नवप्रश्नानाम् (91 – 99) उत्तराणि यथोचितं विकल्पं चित्वा देयानि –**

संस्कृतभाषा भारतवर्षस्य संस्कारभाषा। भारते संस्कृत–भाषायाः प्रतिदिनं विविधसंस्कारकार्येषु प्रयोगः भवति। एतस्याः अनेकासु विशेषतासु इयम् अन्यतमा विशेषता यत् अस्याः वाङ्मये विद्यमानाः सूक्तयः अभ्युदयाय प्रेरयन्ति। अत एव वयं भारत–प्रशासनस्य विभिन्नेषु विभागेषु ध्येय–वाक्य–रूपेण एतेषां प्रयोगं पश्यामः।

एतत् चित्रं पश्यत। एतत् भारतशासनस्य राजचिह्नमस्ति। अत्र 'सत्यमेव जयते' इत्येषः संस्कृतपद्यांशः लिखितः अस्ति। भारतशासनस्य मुद्रायामङ्कितमिदं संस्कृतस्य महत्त्वमुद्भावयति।

जीवनबीमानिगमस्य चित्रे द्वयोः हस्तयोः मध्ये एकः दीपः अस्ति। अधः च 'योगक्षेमं वहाम्यहम्' इति लिखितम्। श्रीमद्भगवद्गीतायाः अयं पद्यांशः अस्य शोभां द्विगुणयति।

भारतीयवायुसेनायाः चिह्ने विमानं वर्तते। तत्र लिखितं वायुसेनायाः ध्येयवाक्यम 'नभः–स्पृशं दीप्तम्' संस्कृत–भाषायाः गौरवगाथां प्रकटयति।

हरियाणा–शासनस्य राज्यचिह्नस्य चित्रे अपि श्रीमद्भगवद्गीतायाः 'योगः कर्मसु कौशलम्' इत्ययं श्लोकांशः जनान् प्रेरयति। लोकसभाध्यक्षस्य आसनस्योपरि अपि सर्वोच्चस्थाने उल्लिखिता अस्ति–'धर्मचक्र–प्रवर्तनाय' इति संस्कृतवाक्यम्। लोकसभायाः केन्द्रीयसभातलस्य भित्तिकायां 'अयं निजः परो वेति' सुप्रसिद्धः संस्कृत–श्लोकः लिखितः अस्ति। डाक–तार–विभागस्य ध्येयवाक्यम्–'अहर्निशं सेवामहे' अतीव उपयुक्तमस्ति। यतः अस्य विभागस्य कार्यं दिने रात्रौ च निरन्तरं चलति।

पश्यत, इदं 'राष्ट्रीयशैक्षिकानुसन्धानप्रशिक्षण–परिषद्' इत्यस्य ध्येय–वाक्यं 'विद्ययाऽमृतमश्नुते' संस्कृतभाषायाम् एव अस्ति।

अन्ये चापि बहवः भारतशासनस्य विभागाः सन्ति येषु संस्कृतध्येय–वाक्यानि स्वीकृतानि सन्ति। अलमतिविस्तरेण। एतेन सुस्पष्टं भवति यत् संस्कृतभाषा भारतस्य जीवनभूता। भारते भाति भारती।

**91.** संस्कृत वाङ्मयस्य सूक्तय कस्मै प्रेरयन्ति ?

(1) नियमानुपालनाय (2) अनुशासनाय (3) अभ्युदयाय (4) मानवज्ञानाय

**92.** गद्यांशे प्रयुक्तस्य 'अन्यतमा' इत्यस्य कोऽर्थः ?

(1) विशिष्टा (2) सर्वमान्या (3) द्वितीया (4) सर्वोत्तमा

**93.** 'गौरवगाथा' इत्यस्मिन् पदे कः समासः, सविग्रहम् नाम दीयताम् :

(1) गौरवाय गाथा – चतुर्थी तत्पुरुषः (2) गौरवं च गाथा च – द्वन्द्व तत्पुरुषः

(3) गौरवात् गाथा – पञ्चमी तत्पुरुषः (4) गौरवस्य गाथा – षष्ठी तत्पुरुषः

**94.** 'वहाम्यहम्' इत्यस्मिन् पदे कः सन्धिः ?

(1) यण्सन्धिः (2) दीर्घसन्धिः (3) गुणसन्धिः (4) अयादिसन्धिः

**95.** 'सत्यमेव जयते' वाक्यम् कुत्र मुद्रितम् अस्ति ?

(1) भारतीयवायुसेनायाः विमाने (2) लोकसभाध्यक्षस्य आसनस्योपरि

(3) जीवनबीमानिगमस्य मुद्रायाम् (4) भारतशासनस्य मुद्रायाम्

96. संस्कृतभाषा भारतवर्षस्य कीदृशी भाषा वर्तते ?

(1) संस्कार भाषा (2) गौरव भाषा (3) अभ्युदय भाषा (4) प्रेरणा भाषा

97. निम्नलिखितेषु 'कल्याण' अर्थे गद्यांशं कः शब्दः प्रयुक्तः ?

(1) अभ्युदयः (2) कौशलम् (3) योगक्षेमः (4) गौरवम्

98. 'मुद्रायाम्' इत्यस्मिन् प्रयोगे का विभक्तिः, किम् च वचनम् अस्ति ?

(1) चतुर्थी - एकवचनम् (2) सप्तमी - एकवचनम्
(3) द्वितीया - एकवचनम् (4) षष्ठी - बहुवचनम्

99. 'नभः स्पृशं दीप्तम्' कस्य ध्येये-वाक्यम् अस्ति ?

(1) हरियाणाशासनस्य राज्यचिह्नम् (2) डाकतार विभागस्य
(3) भारतीयवायुसेनायाः (4) जीवनबीमानिगमस्य

**निम्नलिखितानि पद्यानि पठित्वा षट् (100 - 105) प्रश्नानाम् उत्तराणि यथोचितं विकल्पं चित्वा देयानि -**

खलः सर्षपमात्राणि परच्छिद्राणि पश्यति।
आत्मनो बिल्वमात्राणि पश्यन्नपि न पश्यति॥ 1॥

सर्पदुर्जनयोर्मध्ये वरं सर्पो न दुर्जनः।
सर्पो दशति कालेन दुर्जनस्तु पदे पदे॥ 2॥

चन्दनं शीतलं लोके चन्दनादपि चन्द्रमाः।
चन्द्रचन्दनयोर्मध्ये शीतला साधुसङ्गतिः॥ 3॥

वृथा वृष्टिः समुद्रेषु वृथा तृप्तस्य भोजनम्।
वृथा दानं समर्थस्य वृथा दीपो दिवापि च॥ 4॥

शरदि न वर्षति गर्जति, वर्षति वर्षासु निःस्वनो मेघः।
नीचो वदति न कुरुते, न वदति सुजनः करोत्येव॥ 5॥

100. साधुसङ्गतिः कस्मात् शीतला अस्ति ?

(1) चन्द्रचन्दनयोः उभाभ्याम् (2) शरदृतोः
(3) चन्दनात् (4) चन्द्रमसः

101. 'चन्द्रचन्दनयोः' इत्यस्मिन् पदे कः समासः ?
सविग्रहं नामनिर्देशनम् क्रियताम्।

(1) चन्द्रचन्दनयोः भावः-षष्ठी-तत्पुरुषः
(2) चन्द्राय च चन्दनाय च ताभ्याम् प्रदानम्-चतुर्थी तत्पुरुषः
(3) चन्द्रश्च चन्दनश्च तयोः तुलना-द्वन्द्व समासः
(4) चन्द्रस्य च चन्दनस्य च तयोः समाहारः-इतरेतरद्वन्द्वः

102. सर्पदुर्जनयोर्मध्ये किम् वरम् ?

(1) वृश्चिकः (2) सज्जनः (3) दुर्जनः (4) सर्पः

103. 'शरदि' इत्यस्मिन् शब्दे का विभक्ति, किम् वचनम् ?

(1) द्वितीया - द्विवचनम् (2) पञ्चमी - एकवचनम्
(3) द्वितीया - एकवचनम् (4) सप्तमी - एकवचनम्

**104.** खल: आत्मन: कीदृशानि छिद्राणि न पश्यति?

(1) बिल्वमात्राणि (2) नारिकेलमात्राणि (3) अदृष्टानि (4) सर्षपमात्राणि

**105.** 'नि:स्वनो मेघ:' अत्र 'निस्वनो' पदम् किम् अस्ति?

(1) विशेषणम् (2) क्रिया (3) क्रिया विशेषणम् (4) संज्ञा

**106.** __________ एक: अधिगमस्य प्रकारोऽस्ति यस्मिन् बालक: उच्चतरां मानसिकप्रक्रियां, यथा प्रतिभां (Intelligence), तर्कशक्तिं प्रयोक्तुम् अपेक्ष्यते।

(1) यान्त्रिक (Motor) कौशल – अधिगम: (2) संरचना – अधिगम:

(3) मौखिक – अधिगम: (Verbal) (4) विचारनिर्माण – अधिगम:

**107.** निम्नलिखितेषु कक्षा-अभ्यासेषु छात्रेषु मौखिकभाषाया: विकासार्थं कतम: अभ्यास: अध्यापकस्य सहायतां करोति?

(1) अभिनयेषु भाग – ग्रहणम् (2) नवीनानाम् अथवा अपरिचितशब्दानां शुद्ध-उच्चारणस्य अभ्यास:

(3) अध्यापकेन सह समूहे पठनम् (4) कवितां कण्ठस्थीकृत्य समूहे पठनम्

**108.** भवान् हिन्दीभाषी अध्यापक: अस्ति। परन्तु भवान् पंजाबप्रान्तस्य प्राथमिक विद्यालये नियुक्तो भवति। यत: भवान् तत्क्षेत्रस्य स्थानीय भाषां न जानाति। भवता किं करणीयम्?

(1) आंग्लभाषायां संवाद: करणीय:

(2) समाज: हिन्दीभाषां: शिक्षितुं प्रेरयितव्य:

(3) तत्कालमेव हिन्दीभाषिक्षेत्रे प्रेषितुं निवेदनं कर्त्तव्यम्

(4) बालकस्य भाषा साधनरूपे प्रयोक्तव्य: तथा च अध्यापनं प्रारब्धव्यम्

**109.** पाठ्यपुस्तकस्य विषये निम्नलिखितेषु किं कथनम् सत्यम् अस्ति?

(1) सत्राय शैक्षणिक क्रिया-कलापानां पाठ्यपुस्तकं योजना अस्ति।

(2) पाठ्यपुस्तकस्य स्थानापन्नं भवितुं न अर्हति।

(3) छात्रेभ्य: अध्यापकाय च पाठ्यपुस्तकं अन्तिमं साधनम् अस्ति।

(4) पाठ्यचर्यायां निर्धारितउद्देश्यानां प्राप्त्यै सहायतां करोति।

**110.** अध्यापकरूपेण भवान् समग्र भाषाप्रयोगाय छात्रस्य प्रशंसां करोति, यद्यपि तेन केषाञ्चित् शब्दानां वर्तनी अशुद्धा लिखिता। अत्र स्वकक्षायां भवान् कं उपागमं प्रयुङ्क्ते?

(1) निर्माणात्मकं उपागमम् (2) संरचनात्मकं उपागमम्

(3) समग्रं भाषा उपागमम् (4) सम्प्रेषणात्मकं उपागमम्

**111.** कक्षायां मातृभाषाया: अप्रयोग: कस्य प्रविधे: विशेषता अस्ति?

(1) श्रवणभाषीयताया: (2) प्रत्यक्षस्य (3) प्राकृतिकस्य (4) द्विभाषीयताया:

**112.** पञ्चमीकक्षाया: अध्यापकरूपेण भवान् छात्रान् पाठ्यं सम्पूर्णतया पठितुं कथयति। तदा भवान् तान् सप्रसङ्गं प्रश्नान् उत्तरयितुं कथयति। अस्यां प्रक्रियायां भवान् छात्रान् प्रेरयति __________।

(1) विहंगमदृष्टिपाताय (Skimming)

(2) गहनपठनाय

(3) विस्तृत – पठनाय (Extensive Reading)

(4) क्रमवीक्षणाय (Scanning)

**113.** __________ अर्थावबोध: पाठ्यात् विशेष सूचनां निगृहीतुं पाठ्यांशं निकटतया गहनतया वा पठनस्य कौशलम् अस्ति।

(1) अनुमेय: (Inferential) (2) मूल्याङ्कनक्षम: (Evaluative)
(3) वैश्विक: (4) स्थानीय:

**114.** भाषा अधिग्रहणं तदैव भवति, यदा __________।

(1) बालक: पठितुं अवसरम् दीयते। (2) बालक: भाषाया: साक्षात्कारं करोति।
(3) बालक: व्याकरणनियमान् शिक्ष्यते। (4) बालक: अनुवादे अभ्यासम् कार्यते।

**115.** व्याकरणपाठनस्य निगमनात्मक-उपागम: समर्थयति यद् अस्माभि: प्रथमत: -

(1) उपयुक्तं सम्प्रेषणं कर्त्तव्यम् (2) सततं आवृत्तिभि: अभ्यास: करणीय:
(3) उदाहरणानि प्रस्तौतव्यानि (4) नियमा: प्रस्तौतव्या:

**116.** यदा वयं कथयाम: यत् भाषा स्वच्छन्दा अस्ति, तदा अस्माकम् आशय: अस्ति -

(1) भाषाया: शब्दार्थयो: सम्बन्ध: अन्तर्हित: नास्ति।
(2) भाषा पूर्वनिर्धारितान् सम्बन्धान् अनुकरोति।
(3) भाषाया: शब्दानां तेषां अर्थै: सह अन्तव्यप्तिसम्बन्धोऽस्ति।
(4) शब्दार्थयो: मध्ये सम्बन्ध: केनापि औचित्यपूर्ण कारणेन भवति यादृच्छिक: न।

**117.** भाषाशिक्षकेण छात्रा: स्वतन्त्रलेखनाय प्रेरयितव्या: यत: स्वतन्त्रलेखनस्य मुख्यलाभोऽस्ति -

(1) छात्रा: एतदनुभवं न कुर्वन्ति यत् ते अधिकं सर्वत: शुद्धं वा लिखेयु:।
(2) ते स्वकीय प्रथमभाषाया: लिखितभाषाया: विशेषता: स्वलेखने प्रयोक्तुं शक्नुवन्ति।
(3) एतत् छात्रान् सप्रवाहं मौलिकलेखनाय प्रेरयति।
(4) लेखितुं न लेखितुं वा छात्रा: स्वतन्त्रा: भवन्ति।

**118.** कश्चिद् बालक: कस्मिन्नपि शीर्षके विचारोत्तेजने सत्यपि स्वयमेव कमपि परिच्छेदं लेखितुं न समर्थ:। परन्तु स कस्यापि प्रौढजनस्य, सहपाठिन: वा परामर्शेन एतल्लिखितुं समर्थो भवति। एष: परामर्श: कथ्यते __________।

(1) सहपाठि - परामर्श: (Peer - Counselling)
(2) समूहे (Team) अध्यापनम्
(3) सोपाननिर्माणम् (Scaffolding)
(4) सहपाठि - अध्यापनम् (Peer - teaching)

**119.** __________ तथ्येभ्य: परं अनुमातुं कल्पयितुं वा प्रक्रिया अस्ति।

(1) निष्कर्षणम् (Inference) (2) बहिर्वेशनम् (Extrapolation)
(3) व्याख्यानम् (Explanation) (4) विश्लेषणम् (Analysis)

**120.** भाषाशिक्षणे निदानात्मक परीक्षाया: उद्देश्यम् किम् अस्ति ?

(1) छात्रस्य बोधगम्यतायां कारणानां ज्ञानं तेषां समाधानं च।
(2) प्राप्ते: विवरणं छात्राणां प्रोन्नतिपत्रे लेखनम्।
(3) समेकित-मूल्यांकनाय योजनानिर्माणं प्रश्नानां च सज्जीकरणम्।
(4) मातापितृ-अध्यापक-मेलने पितरौ सूचनाप्रदानम् अवधानं च दातुं प्रेरणम्।

## PART-V

## LANGUAGE-II

## SANSKRIT

| |
|---|
| अभ्यर्थिनः **पञ्चमभागस्य (Part-V)** प्रश्नानाम् **( प्र.सं. 121-150 )** उत्तरं दद्युः, यदि तैः **संस्कृतं द्वितीयभाषा (Language-II)** रूपेण चितम्। |

**निम्नलिखितं गद्यांशं पठित्वा अष्टप्रश्नानां (121 – 128) उत्तराणि विकल्पेभ्यः चित्वा दीयन्ताम्।**

एकस्मिन् अरण्ये कश्चन सिंहः प्रतिवसति स्म। एकदा सः सुप्तः आसीत्। तदा एकः मूषकः तस्य केसरान् अकृन्तत्। प्रबुद्धः सिंहः स्वकेसरान् छिन्नान् अपश्यत्। सः अचिन्तयत् – ''अहो, मम केसराः कृन्ताः। नूनं मूषकस्य कार्यमेतत्। किं करवाणि? भवतु, एवं करिष्यामि। मार्जारः मूषकस्य शत्रुः, अतः कमपि मार्जारं पालयामि। सः मूषकं भक्षयिष्यति'' इति।

सः सिंहः ग्राममगच्छत्। मार्गे कमपि मार्जारमपश्यत्। तस्य समीपं गत्वा सिंहः एवमवदत् – ''भो मित्र मार्जार, मम गृहे कश्चन मूषकः प्रतिवसति। सः सुप्तस्य मम केसरान् कृन्तति, एतं निवारय। त्वं मया सह वस। अहं ते प्रभूतमाहारं दास्यामि'' इति। मार्जारः अकथयत् – ''यथा आदिशति भवान्। अहं त्वया सह वत्स्यामि।''

सिंहः माजरिण सह गुहामगच्छत्। तदा मार्जारः – 'मित्र, अहं क्षुधया पीडितः अस्मि। मह्यमाहारं प्रयच्छ' इत्यकथयत्। सिंहः तस्मै मांसादिकमयच्छत। एवं मार्जारः तत्र सुखमवसत्।

मूषकः मार्जारात् भीतः बिलाद् बहिः नागच्छत्। अतः सिंह मूषकाद् भयं विना सुखेन – कालमनयत्।

मूषकः बिलस्यान्तः आहारं विना क्षीणः अभवत्। क्षुधया सः अचिन्तयत् – 'किं करवाणि? आहारं विना कथं जीवामि। यदि बिलाद् बहिः गच्छामि तर्हि मार्जारः मां पश्यति। अतः अन्धकारे बहिः गत्वा आहारमन्विष्यामि' इति।

मूषकः रात्रौ बिलाद् निरगच्छत्। मार्जारः तमपश्यत्। सद्यः तं गृहीत्वा सिंहमवदत् – ''भो मृगराज, पश्य तव शत्रुः अयं गृहीतः। अलमिदानीं चिन्तया। आवां सुखेन वसावः'' इत्युक्त्वा खादति स्म।

सिंहः अचिन्तयत् – 'इदानीमनेन माजरिण न मे प्रयोजनम्। अतः परमस्मै भोजनं न दास्यामि' इति। ततःपरं सिंहः मार्जारायाहारं नायच्छत्। एकदा क्षुधया पीडितः मार्जारः सिंहमकथयत् – ''मित्र, भवान् स्ववचनं स्मरतु। मह्यमाहारं प्रयच्छतु'' इति।

सिंहः – ''मूर्ख, त्वया न मे प्रयोजनम्। गच्छ यथेष्टम्। न किञ्चिदपि स्मरामि''।

मार्जारः – ''एवम्। अस्तु। कृतघ्न, महत्पापं करोषि यत्स्वयमेव कृतां प्रतिज्ञां विस्मरसि''।

तदाकर्ण्य क्रुद्धः सिंहः मार्जारं हन्तुमुद्यतः। भीतः मार्जारः वृक्षमारुह्य अवदत् –

**विश्वासो नैव कर्तव्यो मधुरासु खलोक्तिषु।**

**121.** 'अरण्य' शब्दस्य निम्नलिखितेषु कः पर्यायवाची?

(1) निर्गमनम् (2) दुर्गमनम् (3) दुर्गमः (4) काननम्

**122.** 'अन्विष्यामि' इत्यस्य सन्धिविच्छेदं कुरुत –

(1) अन्विष् + यामि (2) अन्वि + इष्यामि (3) अन्व् + इष्यामि (4) अनु + इष्यामि

**123.** 'क्षीणः' इत्यस्य शब्दस्य कोऽर्थः?

(1) संकटग्रस्तः (2) अप्रसन्नः (3) मृतः (4) दुर्बलः

130. शङ्कराचार्यस्य जन्म कस्मिन् प्रान्तेऽभवत्?

(1) महाराष्ट्रे (2) केरलप्रान्ते (3) कर्नाटकप्रान्ते (4) कालडीप्रान्ते

131. शङ्कराचार्यः मातरं काम् अनुमतिम् अयाचत्?

(1) शङ्करः मातरं यात्रायां तेन सहगमनस्य अनुमतिम् अयाचत्

(2) शङ्करः मातरं भारतभ्रमणस्य अनुमतिम् अयाचत्

(3) शङ्करः मातरं वेदाध्ययनस्य अनुमतिम् अयाचत्

(4) शङ्करः मातरं संन्यासस्यानुमतिम् अयाचत्

132. 'अधीतवान्' इत्यस्य पदस्य कोऽर्थः?

(1) चिन्तितवान् (2) गतवान् (3) गृहीतवान् (4) पठितवान्

133. नद्यां शङ्कराचार्यः केन गृहीतः?

(1) दस्युना (2) महिषेण (3) मत्स्येन (4) नक्रेण

134. 'उपदिष्टवान्' अस्मिन् पदे कः प्रत्ययः?

(1) वति (2) तव्यः (3) क्तवतु (4) वतुप्

135. शङ्कराचार्यस्य पितुः नाम क आसीत्?

(1) सान्दीपिनी गुरुः (2) शिवगुरुः (3) राजगुरुः (4) देवगुरुः

136. 'प्रदूषण' विषये पाठयोजनायाः निर्माणे भवताम् प्रथमकार्यं किं भविष्यति?

(1) सहायकां पाठ्य-सामग्रीचयनम्
(2) उद्देश्य निर्माणम्
(3) परिचयात्मक प्रश्नानां निर्माणम्
(4) शीर्षकाणां बहुवारम् अध्ययनम्

137. कश्चिद् अध्यापकः समूहचर्चा सहयोगिनः अन्तः सम्पर्कं च कक्षायां प्रोत्साहयति। सःकक्षायां कम् उपागमं प्रयुनक्ति?

(1) संरचनात्मकम् (2) निर्माणात्मकम् (3) पारम्परिकम् (4) धार्मिकम्

138. कश्चिद् अध्यापकः स्वछात्रान् 'जलम्' इति विषयम् अवलम्ब्य परिच्छेदं लेखितुं आदिशति। तदा छात्राः चर्चां कर्तुं प्रारभन्ते यत् तैः विज्ञानकक्षासु तथा समाजशास्त्रकक्षासु किम् शिक्षितम्। तदा ते 'जलम्' इति विषयमवलभ्ब्य परिच्छेदं लिखन्ति। एतद् कस्य उदाहरणम् अस्ति?

(1) पाठ्यचर्यान्तर्गतायाः भाषायाः
(2) सम्प्रेषणात्मक - उपागमस्य
(3) प्रयोगे भाषायाः
(4) विज्ञानस्य भाषायाः

**139.** छात्राः सर्वाधिकप्रभाविरूपेण भाषां तदा शिक्षन्ते, __________

(1) यदा ते अन्तर्बाधापीडिताः सन्ति।

(2) यदा ते प्रेरिताः भवन्ति।

(3) यदा तेषां अध्यापकः सक्षमः भाषाशिक्षकोऽस्ति।

(4) यदा तेषां उत्तमं पाठ्यपुस्तकम् अस्ति।

**140.** यदा भवान् पाठयितुं गच्छति, भवान् प्राप्नोति यत् पाठ्यपुस्तकं कविताभिः, चित्रकथाभिश्च प्रारभते तथा वर्णमालायां समाप्नोति। भाषा-बालशिक्षायाम् अयम् उपागमः कीदृशः अस्ति ?

(1) विभिन्नधर्मदर्शन - उपागमः

(2) सौन्दर्यबोधकः उपागमः

(3) अधः - ऊर्ध्वम् उपागमः (Bottom up)

(4) ऊर्ध्वाधः उपागमः (Top Down)

**141.** अद्य राजूः अतिप्रसन्नः अस्ति, यतः स विद्यालयं गच्छति। स विद्यालयम् आगन्तुं स्वपरिवारे प्रथमः अस्ति। तस्य परिवारे इतः पूर्वं कश्चिदपि जनः तस्य पितरौ अपि, कस्मिन्नापि विद्यालये न पञ्जीकृतः। एवं राजूः __________ अस्ति।

(1) उपेक्षितछात्रः
(2) अल्पसंख्यकछात्रः
(3) प्रथमकुलछात्रः
(4) द्वितीयकुलछात्रः

**142.** स्वकक्षायां कालं शिक्षयितुं भवान् एकस्यैव जनस्य द्वयोः चित्रयोः प्रयोगं करोति। एकं चित्रं पञ्चदशवर्षपूर्वं अङ्कितम्। द्वितीयं चित्रं इदानीम् एव। भवान् कक्षायां तस्य वर्तमानकाले, भूतकाले च चर्चाम् प्रारभते - तस्य आकृतिविषये, स्वभावविषये। इदानीम् भवान् प्रयोगं करोति __________।

(1) बालशिक्षाव्याकरणम्
(2) नियमबद्धं व्याकरणम्
(3) निर्देशात्मकम् व्याकरणम्
(4) संरचनात्मकं व्याकरणम्

**143.** कश्चिद् अध्यापकः वास्तविकजीवनपदार्थान् यथा छत्रम्, वृष्टिरोधकम् (Raincoat), कीलव्यावर्तकम् (Screw Driver) आदीन् कक्षायाम् आनयति। स छात्रान् द्वित्रिवाक्येषु पदार्थान् विवृणोतुं कथयति। यां सामग्रीं अध्यापकः कक्षायां आनयति सा पारिभाषिक शब्दावल्या किं कथ्यते ?

(1) यन्त्राणि
(2) वास्तविकपदार्थाः (Realia)
(3) भाषा-निवेशः
(4) अध्यापन यन्त्राणि

**144.** छात्राः समस्यानां समाधानं सामूहिकरूपेण युगले, समूहे वा कुर्वन्ति। एषा विशेषतः निम्नलिखितेषु कस्य वर्तते ?

(1) समग्र-भाषा-उपागमस्य
(2) संरचनात्मक-उपागमस्य
(3) सम्प्रेषणात्मक-भाषा-अध्यापनस्य
(4) व्यावहारिक-उपागमस्य (Approach)

145. अध्यापकरूपेण भवान् एवं जानाति यत् भवतां छात्राणां कृते पाठे भाषा अतिकठिनास्ति। भवान् भाषां सरलां करोति, छात्राणां आवश्यकतानुसारं विषयवस्तुन्यपि भवान् छात्राणां आवश्यकतानुसारं कानिचित् परिवर्तनानि करोति। भवता यत् कृतं तत् किं कथ्यते ?

(1) मूल्यांकनम् (2) पुनरावलोकनम् (3) स्वीकरणम् (4) अनुकूलनम्

146. तानि कथनानि यानि ज्ञानम्, कौशलम्, प्रवृत्तीश्च वर्णयन्ति, येषां च उपलब्धि: विशिष्ट कक्षाया: पाठ्यक्रमस्य वा अन्ते भवितव्या, निम्नलिखितेषु कस्य अन्तर्गतं आयान्ति ?

(1) संख्या – परिणामे
(2) आधारभूतसाक्षरता–परिणामे
(3) अध्यापन (Outcome) परिणामे
(4) अधिगम – परिणामे

147. भाषिकक्षमता छात्रान् समर्थान् करोति –

(1) एतद् ज्ञातुं यत् कदा उपयुक्ता भाषा भाषितव्या
(2) अधिकाधिकं आंग्लभाषां वक्तुम्
(3) व्याकरणदृष्ट्या शुद्धं वा अशुद्धं वाक्यामिति निर्णेतुम्
(4) व्याकरणदृष्ट्या अशुद्धमपि वाक्यं सप्रवाहं वक्तुम्

148. प्राथमिकस्तरे अध्यापक: प्राय: छात्रान् रङ्गसज्जायै, चित्रकारितायै च प्रेरयति यत: एतत्कार्यं निम्नलिखितं प्रोत्साहयति।

(1) छात्राणां मनोरञ्जनम्।
(2) अध्यापकं अध्यापनकार्यात् विश्रान्तुम्।
(3) कक्षायां छात्रान् मौनं रक्षितुम्।
(4) उत्तमयान्त्रिककौशलं वर्धयितुम्।

149. त्वं ग्रामे जात: परिवर्धित: अपि यत्र प्रत्येकजन: हिन्दी–भाषां भाषते स्म। त्वं यदा विद्यालयं अगच्छ: त्वया आंग्लभाषा, संस्कृतं, हिन्दी, उर्दू भाषा शिक्षिता। इदानीं त्वं आंग्लभाषां अतिप्रवाहेण ब्रवीषि। इदानीं तव प्रथमा भाषा काडस्ति ?

(1) उर्दूभाषा (2) संस्कृतभाषा (3) आंग्लभाषा (4) हिन्दीभाषा

150. यदा भाषा प्राकृतिकरूपेण व्यवस्थितं अभ्यासं विना शिक्ष्यते, एतत् कथ्यते __________।

(1) स्वीकृति: (2) अधिगम: (3) पाण्डित्यम् (4) अधिग्रहणम्

- o O o -

